**अधिष्ठातृ** त्रि० अधि+स्था—तृच् षत्वम् । अध्यक्षे, नियमितकार्य्यविशेषाकरणेन कृताकृतावेक्षके, नियन्तरि च । "आत्मेन्द्रियाद्यधिष्ठातेति" भाषा० । अधिदेवे च । "इन्द्रियाणामधिष्ठातृदेवास्ते परिकीर्त्तिता" इति पुरा० । ते च अधिदेवताशब्दे दर्शिताः सर्वाधिष्ठाता तु परमेश्वर एव तदपि तत्रैवान्तर्यामिब्राह्मणेन दर्शितम् । "तत्सान्निध्यादधिष्ठातृत्वं मणिवदिति" सांख्यसू० । यथायस्कान्तमणेः सान्निध्यमात्रेण शल्यनिष्कर्षकत्वं न सङ्कल्पादिना तथैवादिपुरुषस्य संयोगमात्रेण प्रकृतेर्महत्तत्त्वरूपेण परिणमनम् । इदमेव च सोपाधिस्रष्टृत्वमित्यर्थः । तथाचोक्तम् । "निरिच्छे संस्थिते रत्ने यथा लोहः प्रवर्त्तते । सत्तामात्रेण देवस्य तथा चेयं जगज्जनिः । अत आत्मनि कर्त्तृत्वमकर्त्तृत्वं च संस्थितम् । "निरिच्छत्वादकर्त्तासौ कर्त्ता सन्निधिमात्रतः" इति सां०भा० । स्त्रियां ङीप् ।

**अधिष्ठान** न० अधि+स्था—ल्युट् । नियमितकार्य्यविशेषाकरणेन सान्निध्यमात्रेण नियमनाय, स्थितौ, वेदान्तशास्त्रप्रसिद्धे आरोपाधिकरणे च । वेदान्तिनाञ्च अध्यासस्याङ्गमधिष्ठानं यथा तथाऽध्यासशब्दे वक्ष्यते । अधिकरणे ल्युट् । पुरे आधारमात्रे, आश्रये च । "तदधिष्ठानाश्रयदेहे तद्वाद इति" सां०सू० । "तस्य लिङ्गस्य यदधिष्ठानमाश्रयो वक्ष्यमाणभूतपञ्चकं तस्याश्रये षाट्कौशिके देहे इति भाष्यम्" । करणे ल्युट् । चक्रे, प्रभावे च चक्रेण, प्रभावेन च हि प्रहरणयुद्धकृत्यादिसम्भवः । अधिष्ठानञ्च नियन्तृत्वं यथोक्तं सांख्ये । "संहतपरार्थत्वात् त्रिगुणादिविपर्य्ययादधिष्ठानादिति" "इतश्च पुरुषोऽस्ति अधिष्ठानात् त्रिगुणात्मकानामधिष्ठीयमानत्वात् यद्यत् सुखदुःखमोहात्मकं तत् सर्व्वं परेणाधिष्ठीयमानं दृष्टं यथा रथादि यन्त्रादिभिः, सुखदुःखमोहात्मकञ्चेदं बुद्ध्यादि, तस्मादेतदपि परेणाधिष्ठातव्यम् । स च परस्त्रैगुण्यादन्य आत्मेति" सा०कौ० । भावे ल्युट् । सन्निधिमात्रे । "अत्राधिष्ठानं कुर्विति" आवाहनमन्त्रः । "भोक्तुरधिष्ठानाद्भोगायतननिर्म्माणमन्यथा पूतिभावप्रसङ्गात्" इति सांख्यसू० "भोक्तुः प्राणस्याधिष्ठानात् व्यापारादेव भोगायतनस्य शरीरस्य निर्म्माणं भवति । अन्यथा प्राणव्यापाराभावे शुक्रशोणितयोः पूतिभावप्रसङ्गात् मृतदेहवदित्यर्थः । तथाच रससञ्चारादिव्यापारविशेषैः प्राणो देहस्य निमित्तकारणं धारकत्वादिति भाव इति भा० । ननु प्राणिनः निर्व्यापारस्याधिष्ठाने प्रयोजनाभाव इति तत्राह । "भृत्यद्वारा स्वाम्यधिष्ठितिर्नैकान्त्यात्" इति सा० सू० । "देहनिर्म्माणे व्यापाररूपमधिष्ठानं स्वामिनश्चेतनस्यैकान्त्यात् अपेक्षा नास्ति किन्तु प्राणरूपभृत्यद्वारा यथा राज्ञः पुरनिर्म्माण इत्यर्थः । तथा च प्राणस्याधिष्ठातृत्वं साक्षात्, पुरुषस्याधिष्ठातृत्वं प्राणसंयोगमात्रेणेति सिद्धम् । कुलालादीनां घटादिनिर्म्माणेष्वप्येवम् । विशेषस्त्वयं तत्र चेतनस्य बुद्ध्यादेश्चाप्युपयोगोऽस्ति बुद्धिपूर्व्वकं स्रष्टृत्वादिति । यद्यपि प्राणाधिष्ठानादेव देहनिर्म्माणं तथापि प्राणद्वारा प्राणिसंयोगोऽप्यपेक्ष्यते पुरुषार्थमेव प्राणेन देहनिर्माणादित्याशयेन भोक्तुरधिष्ठानादित्युक्तम् इति भा० । अधिष्ठीयते कर्म्मणि ल्युट् । अधिष्ठिते सन्निधिमात्रेण नियन्त्रिते । "इन्द्रियाणि मनो बुद्धिरस्याधिष्ठानमुच्यते" इति गीता ।

**अधिष्ठित** त्रि० अधि—स्था—कर्म्मणि क्त । अध्युषिते "विलोक्य वृद्धोक्षमधिष्ठितं त्वयेति" कुमा० । सन्निधिमात्रेण नियोजिते "ईश्वराधिष्ठिताः सर्वे स्वं स्वं कार्य्यं हि कुर्वते इति पुरा० ।

**अधिहरि** अव्य० हरौ, विभ० अव्ययी० । हरिमधिकृत्येत्यर्थे

**अधीकार** पु० अधि+कृ—घञ् उपसर्गस्य दीर्घत्वम् । अधिकारशब्दार्थे "सर्वाकरेष्वधीकारो महायन्त्रप्रवर्त्तनम्" इत्युपपातकगणनायां मनुः । "स्वागतं स्वानधीकारानिति" कुमा० ।

**अधीत** न० अधि+इङ—भावे क्त । अध्ययने, कर्म्मणि क्त । कृताध्ययने अभ्यस्ते च त्रि० "ईषदीषदनधीतविद्ययेति" कुसु० । "अधीतवेदवेदाङ्गत्वेनेति" वे०सा० ।

**अधीति** स्त्री अधि+इङ् अध्ययने क्तिन् । अध्ययने "अधीतिबोधाचरणप्रचारणैरिति" नैष० । अधि+इक—स्मरणे क्तिन् । स्मरणे "न ते पूर्व्वस्य वसो अधीतौ तृतीये" इति ऋ०२,४,८, "अधीतौ स्मरणे" इति भाष्यम् ।

**अधीतिन्** त्रि० अधीतमनेन अधीत+इनि । कृताध्ययने । "त्वगुत्तरासङ्गवतीमधीतिनीमिति" कुमा० । एतदिन्यन्तयोगे च कर्म्मणि सप्तमी वेदेऽधीतीत्यादि किन्तु कर्म्माविवक्षया प्रथमं भावे एव क्तः पश्चात् कर्म्मणा योगः कृतपूर्व्वी कटमित्यत्रेव । यथोक्तं हरिणा । "अकर्म्मकत्वे सत्येव क्तान्ते भावाभिधायिनि । पश्चात् क्रियावता कर्त्रा योगो भवति कर्म्मणेति" । विस्तरः मत्कृतसरलायां द्रष्टव्यः ।

**अधीन** त्रि० अधिगतमिनं प्रभुम् अत्या०स० । आयत्ते । वित्ताधीन इत्यादौ तु वित्ते अधि—इति वाक्ये समासे अध्युत्तरपदात् ख । "क्व नु मां त्वदधीनजीवितामिति" कुमा० ।